
# यत्नेन सिद्धिः

## (विशेष्य - विशेषण - प्रयोगः)

कश्चित् पथिकः मार्गे गच्छति स्म । आतपेन सः श्रान्तः अभवत् । गमनसमये सः मार्गपार्श्वे एकं विशालं **वृक्षम्** अपश्यत् । तस्य अधः एकः **शीर्णः** वृद्धः उपविशति स्म । **क्लान्तः पथिकः** चलनक्षमः न आसीत् । अतः सः तं वृद्धं पृष्टवान् - भोः महाशय ! इतः कियद् दूरे ग्रामः अस्ति ? भवान् जानाति वा ?

वृद्धः किमपि उत्तरं न दत्तवान् । पथिकः बहुवारं पृष्टवान् । परन्तु किमपि उत्तरं न प्राप्तवान् । **श्रान्तः पथिकः** कुपितः अभवत् । सः मनसा तं वृद्धम् अनिन्दत्, अग्रे गमनाय यत्नं कृतवान् च ।

पथिकः यदा **त्रिचतुराणि पदानि** अग्रे अगच्छत्, तदा सः वृद्धः तम् उच्चस्वरेण आहूतवान् । **विस्मितः पथिकः** पृष्ठदेशम् अवलोकितवान् । तदा सः वृद्धः वदति - महोदय ! गन्तव्यः ग्रामः इतः क्रोशमिते दूरे अस्ति इति ।



**कुपितः पथिकः** तम् अवदत् - पूर्वम् अहं पुनः पुनः पृष्टवान् । भवान् किमपि उत्तरं न ददाति । इदानीं पृष्ठतः किमर्थं वदति ? वृद्धः **शान्तेन स्वरेण** उक्तवान् - तदा भवान् अग्रे गमिष्यति न वा इति अहं न ज्ञातवान् । यदि भवान् अग्रे न गच्छति, तर्हि मम उत्तरं व्यर्थं स्यात् । इदानीं भवान् नूनम् अग्रे गमिष्यति इति निश्चितम् । अतः उत्तरं ददामि । यः गच्छति सः एव गन्तव्यस्थानं प्राप्नोति । अत एव उक्तम् -

**यत्नशीलस्य जनस्य भाग्यं नित्यशः फलति इति ।**

| **श्रान्तः, शीर्णः, क्लान्तः, नित्यशः, स्वरेण, इतः ।** |
|---|

### टिप्पणी

**शब्दार्थः**

श्रान्तः - परिश्रमयुक्तः - (ପରିଶ୍ରମ ଯୁକ୍ତ) ।

शीर्णः - दुर्बलः - (ଦୁର୍ବଳ) ।

इतः - अस्मात् स्थानात् - (ଏହି ସ୍ଥାନରୁ) ।

मनसा - मनोद्वारा - (ମନରେ) ।

अवलोकितवान् - अवलोकनं कृतवान् (ଦେଖିଲା) ।

क्रोशमिते - क्रोशपरिमिते (କୋଶେ ପରିମାଣର) ।

अध: - तले / निम्नदेशे (ତଳେ) ।

क्लान्त: - क्लान्तिं प्राप्त: (ଥକିଯାଇଥିବା) ।

कुपित: - क्रोधयुक्त: (ରାଗିକରି) ।

विस्मित: - आश्चर्ययुक्त: (ବିସ୍ମୟଯୁକ୍ତ ହୋଇ) ।

गन्तव्य: - गमनयोग्य: (ଯିବା ଯୋଗ୍ୟ) ।

व्यर्थम् - निरर्थकम् (ବ୍ୟର୍ଥ) ।

प्राप्नोति - प्राप्ति: भवति (ପାଏ) ।

स्थूल: गज:



विशालं भवनम्



सुन्दरी महिला



| **विशेषणम्** | **विशेष्यम्** | **विशेषणम्** | **विशेष्यम्** | **विशेषणम्** | **विशेष्यम्** |
|---|---|---|---|---|---|
| दीर्घ: | मार्ग: | मधुरं | लड्डुकम् | कृशा | बालिका |
| गभीर: | सागर: | विशालं | मन्दिरम् | उत्तमा | मापिका |
| चतुर: | काक: | दिव्यम् | औषधम् | प्रसिद्धा | लेखिका |
| निर्मल: | आकाश: | महत् | वनम् | महती | नदी |
| महान् | जन: | सरलं | संस्कृतम् | सुन्दरी | नगरी |

## अभ्यास :

**१. उदाहरणानुसारं विशेषण-विशेष्ययो : लेखनं कुरुत -**

| *यथा -* | | *विशेषणम्* | *विशेष्यम्* |
|---|---|---|---|
| (क) विशालं | वृक्षम् | विशालं | वृक्षम् |
| (ख) शीर्ण: | वृद्ध: | .............. | .............. |

(ग) क्लान्तः पथिकः .............. ..............

(घ) श्रान्तः जनः .............. ..............

(ङ) गन्तव्यः ग्रामः .............. ..............

(च) यत्नशीलस्य लोकस्य .............. ..............

(छ) कुपितः पथिकः .............. ..............

(ज) बुद्धिमती बालिका .............. ..............

(झ) सुन्दरी नगरी .............. ..............

**२. उदाहरणानुसारं विशेष्यस्य लिङ्गानुसारं विशेषणस्य प्रयोगं कुरुत -**

विशाल

भवनम् - विशालं भवनम्
मार्गः - विशालः मार्गः
घटी - विशाला घटी

स्वच्छ

.................... कूपी
.................... दर्पणः
.................... वस्त्रम्

प्रसिद्ध

वनम् ........................
विपणिः ......................
ग्रामः ........................

महत्

शक्तिः
धैर्यम्
पराक्रमः

प्राचीन

शाटिका
भवनम्
ग्रन्थः

**अवधेयम्**

***विशेष्यस्य यत् वचनं तदेव वचनं विशेषणस्य -***

| | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| **यथा -** | उन्नतः वृक्षः | उन्नतौ वृक्षौ | उन्नताः वृक्षाः |
| | नूतनं सङ्गणकम् | नूतने संगणके | नूतनानि संगणकानि |
| | रम्या कथा | रम्ये कथे | रम्याः कथाः |

३. **विशेष्यस्य वचनानुसारं विशेषणस्य प्रयोगं कुरुत -**

| | | | |
|---|---|---|---|
| उदाहरणम् - | पक्वं फलम् । | पक्वे फले । | पक्वानि फलानि (पक्व) |
| (क) | ............ स्यूतः । | ............ स्यूतौ । | ............ स्यूताः (शोभन) |
| (ख) | ............ लता । | ............ लते । | ............ लताः । (दीर्घ) |
| (ग) | ............ सूत्रम् । | ............ सूत्रे । | ............ सूत्राणि । (कठिन) |
| (घ) | ............ गर्तः । | ............ गर्तौ । | ............ गर्ताः । (गभीर) |
| (ङ) | ............ लेखनी । | ............ लेखन्यौ । | ............ लेखन्यः । (नूतन) |
| (च) | ............ आश्रमः । | ............ आश्रमौ । | ............ आश्रमाः । (शान्त) |
| (छ) | ............ युतकम् । | ............ युतके । | ............ युतकानि । (शुभ्र) |
| (ज) | ............ घटी । | ............ घट्यौ । | ............ घट्यः । (शोभन) |
| (झ) | ............ दर्पणः । | ............ दर्पणौ । | ............ दर्पणाः । (निर्मल) |

४. **उदाहरणानुसारम् उचितेन विभक्तिरूपेण वाक्यनिर्माणं कुरुत -**

**उदा -** उत्तमः बालकः अस्ति । तम् आह्वयतु । - उत्तमं बालकम् आह्वयतु ।

उन्नता शाखा अस्ति । कपिः ताम् आरोहति । - उन्नतां शाखां कपिः आरोहति ।

(क) उत्तुङ्गः गिरिः अस्ति । तं पश्यतु । ..........................................

(ख) निर्दयः पुरुषः अस्ति । तस्मै सर्वे क्रुध्यन्ति । ..........................................

(ग) गभीरः कूपः अस्ति । जनाः ततः जलम् आनयन्ति । ..........................................

(घ) श्रेष्ठः शिक्षकः अस्ति । छात्राः तस्मात् पाठं पठन्ति । ..........................................

(ङ) सुदीर्घः मार्गः अस्ति । तेन वाहनानि गच्छन्ति । ..........................................

(च) समीचीना लेखनी अस्ति । भवान् तां क्रीणातु । ..........................................

(छ) धीरा बालिका अस्ति । तया सह शिक्षकः याति । ..........................................

(ज) उन्नतं भवनम् अस्ति । जनाः तत्र तिष्ठन्ति । ..........................................

(झ) ज्ञानप्रदं संस्कृतम् अस्ति । वयं तत् पठामः । ..........................................

(ञ) धीमती युवती अस्ति । तस्यै पारितोषिकं दद्मः । ..........................................

५. **विशेष्यस्य विभक्त्यनुगुणं विशेषणस्य विभक्तिं वचनं च परिवर्त्य लिखत -**

| | | | |
|---|---|---|---|
| अहं | (दीर्घ) | दीर्घं | मार्गं गच्छामि । |
| | (मलिन) | | वस्त्राणि क्षालयामि । |
| | (चतुर) | | बालकौ पाठयामि । |
| अहम् | (उत्तम) | | जनैः सह भ्रमामि । |

(निर्धन) भिक्षुकाय धनं ददामि ।

(गहन) अरण्यात् काष्ठम् आनयामि ।

(आधुनिक) समाजे उत्साहं पूरयामि ।

(प्रिय) मित्राय शाकं ददामि ।

(मधुर) भाषया कथां श्रावयामि ।

(स्वकीय) टिप्पणीपुस्तकेन पाठं लिखामि ।

(पवित्र) गङ्गानद्यां स्नानं करोमि ।

उदा - अहं दीर्घं मार्गं गच्छामि ।

१) .................................... २) ............................................

३) .................................... ४) ............................................

५) .................................... ६) ............................................

७) .................................... ८) ............................................

९) .................................... १०) ..........................................

६. **एकेन पदेन उत्तरं लिखत -**

(क) पथिकः श्रान्तः कथम् अभवत् ? ..........................................

(ख) पथिकः मार्गे किम् अपश्यत् ? ..........................................

(ग) ग्रामः इतः कियत् दूरे अस्ति ? ..........................................

(घ) कीदृशः पथिकः कुपितः अभवत् ? ..........................................

(ङ) क्रोशमिते दूरे कः अस्ति ? ..........................................

(च) कः गन्तव्यं स्थानं प्राप्नोति ? ..........................................

(छ) कस्य भाग्यं नूनं फलति ? ..........................................

७. **संक्षेपेण उत्तरं कुरुत -**

(क) पथिकः मार्गपार्श्वे किम् अपश्यत् ? ..........................................

(ख) वृक्षस्य अधः कः उपविशति स्म ? ..........................................

(ग) कः किमपि उत्तरं न दत्तवान् ? ..........................................

(घ) श्रान्तः पथिकः केन वृद्धम् अनिन्दत् ? ..........................................

(ङ) विस्मितः पथिकः कुत्र अवलोकितवान् ? ..........................................

(च) गन्तव्यः ग्रामः कियत् दूरे अस्ति ? ..........................................

(छ) कः पृष्ठदेशम् अवलोकितवान् ? ...............................................

(ज) वृद्धः केन स्वरेण उक्तवान् ? ...............................................

(झ) यः गच्छति सः किं प्राप्नोति ? ...............................................

(ञ) यत्नशीलस्य किं फलति ? ...............................................

**८. शून्यस्थानं पूरयत ।**

(क) ................ पथिकः ।

(ख) ............... ग्रामः ।

(ग) शीर्णः ............... ।

(घ) विशालं ............... ।

(ङ) श्रान्तः ...............

(च) यत्नशीलस्य ............... ।

**(वृक्षम्, जनस्य, पथिकः, वृद्धः, क्लान्तः, गन्तव्यः)**

**९. संशोधनं कुरुत ।**

(क) एकं विशालः वृक्षम् अपश्यत् ।

(ख) क्लान्तः पथिकं चलनक्षमः न आसीत् ।

(ग) विस्मितं पथिकः पृष्ठदेशम् अवलोकितवान् ।

(घ) गन्तव्यः ग्रामं इतः क्रोशमिते दूरे अस्ति ।

(ङ) वृद्धः शान्तं स्वरेण उक्तवान् ।

(च) यत्नशील जनस्य भाग्यं नूनं फलति ।

(छ) त्रिचतुरान् पदानि अग्रे गतवान् ।

**१०. स्तम्भद्वयं योजयत -**

| 'क' | 'ख' |
|---|---|
| विशालम् | वृद्धः |
| शीर्णः | पथिकः |
| क्लान्तः | कुपितः |
| पथिकः | वृक्षम् |
| गन्तव्यः | स्वरेण |
| शान्तेन | जनस्य |
| यत्नशीलस्य | ग्रामः |